टितेक्वणाममम॥१४१॥सुताः कमाहूय चिराय चुंकृतैर्विधाय कंप्राणिमुखानिकं प्रति॥कथा
सुशिध्वमितिप्रमील्य सः स्रुतस्यसेकाद्बुबुधेन्नृपाश्रुणः॥१४२॥इत्यममुं विलपंतममुंचद्दीनद
यालुतयावनिपालः॥रूपमदर्शि धृतोसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय॥१४३॥श्रांतदजा
श्रुभिरनुश्रियमाणमार्गान्नृपाक्रुशोकनिर्गमितनेत्रपयःप्रवाहान्॥चक्रे सचक्रनिभचंक्रमण
छलेन नीराजनां जनयतां निजबांधवानाम्॥१४४॥ ॥श्रीहर्षं कविराजराजिमुकुटालंका
रहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं॥तच्चिंतामणिमंत्रचिंतनफले शृं
गारभंग्या महाकाव्ये चारुणि नैषधीयचरिते सर्गोयमादिर्गतः॥ ॥उमाजानिर्जयतितरां॥ अ
विगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः॥ वचसामपि गोचरो न यः सतमानंदम

नैष॰ १४ विंदतद्विजः॥१॥अधुनीतखगःसनैकधातनुमुत्फुल्लतनूरुहीकृतां॥करयंत्रणदंतुरांतरेव्यलि
षच्चंचुपुटेनपक्षती॥२॥अयमेकतमेनपक्षतेरधिमध्योर्ध्वगजंघमंघ्रिणा॥स्खलनक्षणए
वशिश्रियेद्रुतकंडूयितमौलिराननं॥३॥सगरुद्वनदुर्गगुप्तयेहात्कंडुकीटानदशत्ततःसतः प२
क्वचित्॥नुनुदेतनुकंडुपंडितःपटुचंचूपुटकोटिकुट्टनैः॥४॥अयमेत्यतडागनीडजैर्ल
घुपर्यव्रियताथशंकितैः॥उदडीयतवैकृतात्करग्रहजादस्यविकस्वरस्वरैः॥५॥वहतोव
हुशैवलक्ष्मतांधृतरुद्राक्षमधुव्रतंखगः॥सनलस्यपपौकरंपुनःसरसःकोकनदभ्रमा
द्दिव॥६॥पतगश्चिरकाललालनादतिविस्रंभमवापितोनुसः॥अतुलंविदधेकुतूहलं राम
भुजमेतस्यभजन्महीभुजः॥७॥नृपमानसमिष्टमानसःसनिमज्जत्कुतुकामृतोर्मिषु॥अव १४

त्वंवितकर्णाशःकुलीकलशीकंरचयन्नवोचत॥८॥मृगयानविगीयतेनृपैरपिधर्मागममर्मपा
रगैः॥स्मरसुंदरमायदत्यजत्तवधर्मःसदयोदयोज्वलः॥९॥अवलस्वकुलाशिनोझषान्निज
नीडद्रुमपीडितःखगान॥अनवद्यतृणार्दिनोमृगान्मृगयाघायनभूभृतांघ्नतां॥१०॥यदवा
दिषमप्रियंतवप्रियमाधायतुतुत्सुरस्मितत॥कृतमातपसंज्वरंतरोरभिमृष्यामृतमंशुमानि
व॥११॥उपतन्नमयाचितंहितंपरिहर्तुनतवापिसांप्रतम्॥करकल्पजनांतराद्विधेःशुचि
तःप्रापिसहिप्रतिग्रहः॥१२॥पतगेनमयाजगत्पतेरुपकृत्यैतवकिंप्रभूयते॥इतिवेद्मितन
तुत्यजंतिमांतदपिप्रत्युपकर्तुमर्त्तयः॥१३॥अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रि पि२
यां॥पृथुरित्यमथाणुरस्तुसानविशेषेविदुषामिहग्रहः॥१४॥भवितानविचारचारुचेत्त

नैषः
१५

दपिश्रव्यमिदंमदीरितं॥खगवागिप्रमित्यनोपिकिंनमुदंधास्यतिकीरगीरिव॥१५॥सजयत्यरिसार्थसा
र्थकीकृतनामाकिलभीमभूपतिः॥यमवाप्यविदर्भभूःप्रभुंहसतिद्यामपिशक्रभर्तृकां॥१६॥दम
नादमनाक्प्रसेदुषस्तनयांतथ्यगिरस्तपोधनात्॥वरमापसदिष्टविष्टपत्रितयानन्यसदृग्गु
णोदयां॥१७॥भुवनत्रयसुभ्रुवामसौद मयन्तीकमनीयतामदं॥उदियायतस्तनुश्रियादमयं प४
तीतिततोभिधांदधे॥१८॥श्रियमेवपरंधराधिपाद्गुणसिंधोरुदितामवेहितां॥व्यवधावपि
वाविधोःकलांमृडचूडानिलयांनवेदकः॥१९॥चिकुरप्रकराजयंतितेविदुषीमूर्द्धनिसा राम
बिभर्तियान्॥पशुनाप्यपुरस्कृतेननतत्तुलनामिच्छतुचामरेणकः॥२०॥स्वदृशोर्जनयंतिसां १५
त्वनांखुरकंडूयनकैतवान्मृगाः॥जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभयाभयात्॥२१॥

अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि॥ श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते॥२२॥
नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे॥ अपि खंजनमंजनांचिते विदधाते रुचिगर्वदुर्वि-
धं॥२३॥ अधरं किल बिंबनामकं फलमस्मादिति भव्यमन्वयं॥ लभतेधरबिंबमित्यदः पदमस्या र-
दनच्छदं वदत्॥२४॥ हृतसारमिवेन्दुमंडलं दमयंतीवदनाय वेधसा॥ कृतमध्यबिलं विलोक्यते
धृतगंभीरखनीखनीलिम॥२५॥ धृतलांछनगोमयांचनं विधुमालेपनपांडुरं विधिः॥ भ्रमयत्युचि-
तं विदर्भजाननतीराजनवर्द्धमानकं॥२६॥ सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखा-
त्॥ अधुनापि न भंगलक्षणासलिलोन्मज्जनमुज्झति स्फुटं॥२७॥ धनुषी रतिपंचबाणयोरुदिते
विश्वजयाय तद्भ्रुवौ॥ नलिके नु तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः॥२८॥ सदृशी

नैषः
२६

तवशस्वरमापदंजलं द्दुर्गमस्यमृणालजिह्दुजा॥ अपिमित्रजुषांसरोरुहां गृहयालुः करलीलपाश्रियः
॥२९॥ वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी॥ विधिनापि न रोमरेखया कृतसी
म्नी प्रविभज्य रज्यतः॥३०॥ अपितद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधतां॥ स्मरयौवनयोः
खलु द्वयोः प्लवकुंभौ भवतः कुचावुभौ॥३१॥ कलशे निजहेतुदंडजः किमु चक्रभ्रमिका
रिताguणः॥ स तदुच्चकुचौ भवन्प्रभाझरचक्रभ्रमिमातनोति यत्॥३२॥ भजते खलु षण्मुखं शि
खी चिकुरैर्निर्मितबर्हगर्हणः॥ अपि जंभरिपुं दमस्वसुर्जितकुंभः कुचशोभयोराट॥३३॥ उद राम २६
रं तनमध्यपृष्ठता स्फुरदंगुष्ठपदेन मुष्टिना॥ चतुरंगुलिमध्यनिर्गतत्रिवलिभ्राजिकृतं दमस्व
सुः॥३४॥ उदरं परिमा ति मुष्टिना कुतुकी कोपि दमस्वसुः किमु॥ धृततत्स्वतुरंगुली वयद्बलि

प्रिभीतिसहेमकाञ्चिभिः॥३५॥पृथुवर्त्तुलतन्नितंबकृन्मिहरस्यंदनशिल्पशिक्षया॥विधिरेक
कचक्रचारिणं किमु निर्मित्सति मान्मथं रथम्॥३६॥तरुमूरुयुगेन सुंदरी किमु रंभां परिणाहि
नापरं॥तरुणीमपि जिष्णुरेव तां धनदापत्यतपःफलस्तनी॥३७॥जलजे रविसेवयेव ये पदमे
तत्पदतामवापतुः॥ध्रुवमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्रदंपती॥३८॥श्रितपुण्यस
रःसरित्कथं न समाधिं क्षपिताखिलक्लमं॥जलजं गतिमेतु मंजुलां दमयंतीपदनाम्नि ज
न्मनि॥३९॥सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता॥अतिथित्वमना
यि सा दृशोः सदसत्संशयगोचरोदरी॥४०॥अवधृत्य दिवोपि यौवतैर्न सहाधीतवतीमिमाम
हम्॥कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिंतयम्॥४१॥अनुरूपमिमं निरूपयन्न

क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिंचितं मित्यमरः २

नैष॰ १७

घनर्वैद्यपिपूर्वपक्षतां॥सुवसुव्यपनेतुमक्रमस्त्वयिसिद्धांतमियंन्यवेशयत्॥४२॥अनयातवरूप
सीमयाकृतसंस्कारविबोधनस्यमे॥चिरमप्यवलोकिताद्यसास्मृतिमारूढवतीशुचिस्मिता॥४३॥
त्वयिवीरविराजतेपरंदमयंतीकिलकिंचितंकिल॥तरुणीस्तनएवदीप्यतेमणिहारावलिराम
णीयकं॥४४॥तवरूपमिदंतयाविनाविफलंपुष्पमिवावकेशितः॥इयमद्यधनोर्वृथावनीस्व
वतीसंप्लवदस्तिकापिका॥४५॥अनयामरकाम्यमानयासहयोगःसुलभस्तुनत्वया॥घनसंवृतयां
बुदागमेकुमुदेनेवनिशाकरत्विषा॥४६॥तदहंविदधेतथातथादमयंत्याःसविधेतवस्तवं॥
हृदयेतिहितत्त्वयाभवानपितेन्द्रेणयथापनीयते॥४७॥तवसंमतिमेवकेवलामधिगंतुंधिगिदं
निवेदितं॥ब्रुवतेहिफलेनसाधवोनतुकंठेननिजोपयोगितां॥४८॥तदिदंविशदंवचोमृतं

मम४

राम
१७

परिपीयामुदितंद्विजाधिपात्॥अतितृप्ततयाविनिर्ममेसतदुद्गारमिवस्मितंसितं॥४९॥परिमृज्यभुजा
ग्रजन्मनःपतगंकोकनदेननैषधः॥मृदुतस्यमुदे किरद्गिरःप्रियवादामृतकूपकंवजाः॥५०॥नतु
ल्लाविषयेतवाकृतिर्नवचोवर्त्मनितेसुशीलता॥त्वदुदाहरणाकृतौगुणाइतिसामुद्रिकसारमु
द्रणा॥५१॥नसुवर्णमयीतनुःपरंननुकिंवागपितावकीनथा॥नपरंपथिपक्षपातितानवलंवे
किंमुमादृशेपिसा॥५२॥स्मशतापमृतामयाभवानमरुदासादितुषारसारवान्॥वनितामितरःसतां
पुनर्गुणवत्संनिधिरेवसंनिधिः॥५३॥शतशःश्रुतिमागतेवसात्रिजगन्मोहमहौषधिर्मम॥अ
मुनातवशंसितेनतुस्वदृशैवाधिगतामवैमितां॥५४॥अखिलंविदुषामनाविलंसुहृदाचस्व
हृ दाचपश्यतां॥सविधेपिनसूक्ष्मसाक्षिणीवदनालंकृतिमात्रमक्षिणी॥५५॥अमितंमधु

नैषः
१८

भवेत्

तत्कथाममश्रवणप्राघुणीकृतां जनैः॥ मदनानलबोधनैरयगणाप्याधिगधैर्यधारिणः॥५६॥
विषमोमलयाहिमंडलीविषफूत्कारमयोमयोहितः॥ स्वगकालकलत्रदिग्भवः पवनस्तद्वि
रहानलैधसा॥५७॥ प्रतिमासमसौनिशापतिः स्वगसंगच्छतियद्विनाधिपं॥ किमुतीव्रतरैस्ततः
करैर्ममदाहाय सधैर्यतस्करैः॥५८॥ कुसुमानियदिस्मरेषवो नतु वज्रं विषवल्लिजानि तत्॥
हृदयं यदमूमुहन्नमूर्ममयद्वाततिनरामतीतपन्॥५९॥ न दिहानवधौ निमज्जतो मम कंदर्पशि
राधिनीरधौ॥ भवपोतइवावपत्वं वतं विधिनाकस्मिकसृष्टसंनिधिः॥६०॥ अथवा भवतः प्रव
र्तनात कथं पिष्टमिदं पिनष्टि तः॥ स्वतएवसतां परार्थता ग्रहणानां हि यथाययार्थता॥६१॥ तव
वर्त्मनिवर्तितां शिवं पुनरस्तुत्वरितं समागमः॥ अपि साधय साधयेप्सितं स्मरणीयाः समये वयं वयः॥

राम
१८

लं

॥९२॥इतितंसविसृज्यधैर्यवान्नृपतिःसूनृतवाग्बृहस्पतिः॥अविशद्वनवेश्मविस्मितःस्मृतिलग्नैः
कलहंसशंसितैः॥९३॥अथभीमसुतावलोकनैःसफलीकर्तुमहस्तदेवसः॥क्षितिमंडलमंडना
यितंनगरंकुंडिनमंडजोपययौ॥९४॥प्रथमंपथिलोचनातिथिंपथिकप्रार्थितसिद्धिशंसिनं॥कल
शजलंसंभृतंपुरःकलहंसःकलयांबभूवसः॥९५॥अवलंब्यदिदृक्षयांबरेक्षणमाश्चर्यरसा
लसंगतं॥सविलासवनेवनीभृतःफलमैक्षिष्टरसालसंगतं॥९६॥नभसःकलभैरुपासितं
जलदैर्भूरितरक्षुपंतगम्॥सददर्शपतंगपुंगवोविटपच्छन्नतरक्षुपन्नगम्॥९७॥सययौयुत
पक्षतिःक्षणांक्षणमूर्ध्वायनदुर्विभावनः॥विततीकृतनिश्चलच्छदःक्षणमालोककदत्तकौ
तुकः॥९८॥तनुदीधितिधारयारयाद्रुतयालोकविलोकनामसौ॥छदहेमकषन्निवालस

त्कषपाषाणनिभेननभस्तले ॥६९॥ विनमद्भिरधस्थितैःखगैर्झटितिश्येननिपातशंकिभिः ॥ स
तिरैक्षिहंसैकयोपरिस्पन्दमांकारितिपत्रपद्धतिः ॥७०॥ ददृशेनजनेनयन्नसौभुवितत्क्षोणिप
मवेक्ष्यतत्क्षणात ॥ दिविदिक्षुवितीर्णचक्षुषापृथुवेगद्रुतमुक्तदृक्पथः ॥७१॥ नववनंप
थिशिशिप्रियेमुनाक्वचिदप्युच्चतरङ्गचारुतं ॥ नसमंगोत्रजमन्यवादिवागतिवेगप्रसरङ्गचारुतं
॥७२॥ अथभीमभुजेनपालितांनगरींमंजुरसौधराजिता ॥ पतग स्यजगामदृक्पथंहरशैलो
पमसौधराजिता ॥७३॥ दयितंप्रतियत्रसंततारतिहासाइवरेजिरेभुवः ॥ स्फटिकोपलविग्र
हागृहाःशशभृद्भित्तनिरंकभित्तयः ॥७४॥ नपतत्त्वमणीगृहत्विषामुपधेर्यत्रभयेनभास्व
नः ॥ शशशार्थमुवासवासरेप्यसदाहत्तृसुदयन्नमंतमः ॥७५॥ सितदीप्रमणिप्रकल्पितेयदगा

उपधिछद्मकैतवेइत्यमरः

रेहसदंकरोदसि॥ निखिलान्निशिपूर्णिमातिथीनुपतस्थेतिथिरेकिकातिथिः॥ ७६॥ सुदतीजनमज्ज
नार्पितैर्घुसृणैर्यत्रकषायिताशया॥ ननिशाखिलयापिवापिकाप्रससादग्रहिलेवमानिनी॥ ७७॥
क्ष्णातीरवयापयातिशिश्रितवप्रावलियोगपट्टया॥ मणिवेश्ममयंस्मनिर्मलंकिमपिज्योतिरखा
ण्डमिज्यते॥ ७८॥ विललासजलाशयोदरेक्वचनद्यौरनुबिंबितेवया॥ परिखाकपटस्फुटस्फुरत्प्रति
बिंबानवलंबितांबुनि॥ ७९॥ व्रजतेदिवियद्गृहावलीचलचेलांचलदंडताडनाः॥ व्यातरन्न
रुणायविश्रमंस्वजतेहेलिहयालिचालितां॥ ८०॥ क्षितिगर्भधरांवरालयैस्तलमध्योपरिपू
रिणांपृथक॥ जगतांखलुयाखिलाद्भुताजनिसारैर्निजचिह्नधारिभिः॥ ८१॥ दधदंबुदनी
लकंठतांवहदत्यच्छसुधोज्ज्वलंवपुः॥ कथमस्तुनामयत्रनक्षितिभृन्मंदिरमिंदुमौलितां॥ ८२॥

कूर्तपः शालभंजिके लमरः

ओन्द्र

नैषः
१०

बहुरूपकशालिभंजिकामुखचन्द्रेषु कलंकरंकवः॥ यदनेककमौधकंदरीहरिभिः कुक्षिगतीकृ
ताइव॥ ८३॥ वलिसद्मदिवं समत्यया गुपरिस्माह दिवो पिताऽदः॥ अधरायकृताययेव सा विप
रीताजनि भूविभूषया॥ ८४॥ प्रतिहट्टपथे घरट्टजात् पथिकाह्वानदसक्तुसौरभैः॥ कलहान्न घ
न्य नात्यदुत्थितादधुनाप्युज्झति घर्घरस्वनः॥ ८५॥ वरणाः कनकस्य मानिनीं दिवमंकादमराद्रिराग
तां॥ घनरत्नकपाटपक्षतिः परिरभ्यानुनयन्तु वासयां॥ ८६॥ अनलैः परिवेषमेत्य याज्वलद
र्कोपलवप्रजन्मभिः॥ उदयं तपमंतराऽरवेरवहद्वारणपुरीपरार्द्धतां॥ ८७॥ बहुकंबुमणिर्वरा
टिकागणनाटत्कारकर्कटोत्करः॥ हिमवालुकयाच्छवालुकः पटुदध्वान यदापगाऽर्णवः॥ राम
लघाः ॥ ८८॥ पदगारववं टाट्टकुट्टिमसत्ववदिदूपल्लंतु दिल्लापया॥ मुमुचे न पतिव्रतौ चित्ती प्रतिचंद्रो १०

निबद्धाभूः

दयमभ्रगंगया॥८९॥रुचयोस्तमितस्यभास्वतःस्खलितायत्रनिरालयाःखलु॥अनुसायमभु
र्विलेपनतापणाकश्मीरजपण्यवीथयः॥९०॥विततंवणिजापणेरविलंपणेतुंयत्रजनेनवी
क्ष्यते॥मुनिनेवमृकंडुसूनुनाजगतीवस्तुपुरोदरेहरेः॥९१॥सममेणमदैर्यदापणेतुलयन्सौ
रभलोभनिश्चलं॥पणितानजनारवैरवैदपिगुंजंतमलिंमलीमसं॥९२॥रविकांतमयेनसेतु
नासकलाहर्ज्वलनाहितोष्मणा॥शिशिरेनिशिगच्छतांपुराचरणौयत्रदुनोतिनोहिमं॥९३॥
परिखावलयच्छलेनयानपरेषांग्रहणस्यगोचरा॥फणिभाषितभाष्यफक्किकाविषमांकुंडल
नामवापिता॥९४॥मुखपाणिपदाक्षिपंकजैरचितांगेषुपरेषुचंपकैः॥स्वयमादित्यत्र
भीमजास्मरपूजाकुसुमस्रजःश्रियं॥९५॥जघनस्तनभारगौरवाद्वियदालंब्यविहर्तुमक्षमाः॥
विधुदीधितिजेनयत्पथंपयसानैषधशीलशीतलां शशिकांत
मयेनपांगंसकलिनाव्रजःकल्पितपतिस्मनातपः।

नैष:
११

ध्रुवमप्सरसोवतीर्यपांशतमध्यासततत्सखीजनः॥९६॥स्थितिशालिसमस्तवर्णतांनकथंचित्रम
यीबिभर्तुया॥स्वरभेदमुपैतुयाकथंकलितानल्पमुखारवानया॥९७॥स्वरुचारुणयापताक
यादिनमर्कैगासमीपुषोन्हषः॥लिलिहुर्वहुधासुधाकरंनिशिमाणिक्यमयापदालयाः॥९८॥
लिलिहेस्वरुचापताकयानिशिजिह्वानिभयासुधाकरम्॥श्रितमर्ककरैःपिपासुपन्नपसद्मा
मलयध्मागजं॥९९॥अमृतद्युतिलक्ष्मपीतयामिलितंयद्बलभीपताकया॥वलयापित
शेषशापिनःसखितामादितपीतवाससः॥१००॥अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्त
वाजिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना॥पूर्वंगाधिसुतेनसामिघटितामुक्ता राम
तुमंदाकिनीयत्प्रासादुकूलवल्लिरनिलान्दोलैरखेलद्दिवि॥१०१॥यदतिविमलनी ११

बवस्त्रुवल्लिः॥अलभतशमनस्वधुःशिशुत्वंदिवसकरांकतलेचलाल्लुठंती॥१०३॥स्वप्रागोश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकंपाथोदंनिज
बवस्त्रुवल्लिः॥अलभतशमनस्वसुःशिशुत्वंदिवसकरांकतलेचलाल्लुठंती॥१०४॥१
केलिसौधशिखरादारुत्स्वपत्काभिनी॥साक्षादप्सरसोविमानकलितव्योमानएवाभवद्घनप्रापनिमेषमन्त्रतरसायांतीरसाद्धनि॥१०४॥१
सौ
त्नवेश्मरश्मिभ्रमरित्तभाःशुचिसौंतंजत्नसेकप्रक्रियागौरवेणाव्यारचिसत्त्हृतचित्तैत्रमैमीवनेन॥१०१
॥अथकनकपतत्रस्तत्रतांराजपुत्रीमदसिसहशभासांविस्फुरंतीसखीनां॥उडुपरिषदिमध्यस्था
पिशीतांशुलेखानुकरणपटुलक्ष्मीमक्लिलक्षीचकार॥१०३॥भ्रमणरयविकीर्णस्वर्णभासा
खगेनक्कचनपतनयोग्यंदेशमन्विष्यताधः॥मुखविधुमदसीयंसेवितुंलंवमानःशशिपरिधि
रिवोर्द्धेमंडलस्तेनतेने॥१०७॥अनुभवतिशचीत्यंसाघृताचीमुखाभिर्नसहसहचरीभिर्नंदनानंदमुच्चैः॥
इतिमतिरुदयासीत्पक्षिणःप्रेक्ष्यभैमींविपिनभुविसखीभिःसार्द्धमावद्धकेलीम॥१०८॥छ छ छ॥श्री
हर्षंकविराजराजिमुकुटालंकारहीरःसुतंश्रीहीरःसुषुवेजितेन्द्रियचयंमामल्लदेवीचयं॥द्वैतीयीकतया
मितोयमगमत्तस्यप्रबंधेमहाकाव्येचारुणिनैषधीयचरितेसर्गोनिसर्गोज्वलः॥ छ॥श्रीरस्तु॥आकुंचिताभ्या
मितोयमगमत्तस्यप्रबंधेमहाकाव्येचारुणिनैषधीयचरितेसर्गोनिसर्गोज्वलः॥ छ॥श्रीरस्तु॥आकुंचिताभ्या
मितोयमगमत्तस्यप्रवंधेमहाकाव्येचारुणिनैषधीयचरितेसर्गोनिसर्गोज्वलः॥कस्यानोन्नानगायादिविसुरसुरभेराश्यदेशांगतानैर्यङ्गोग्रासप्रदानव्रतसुकृतमवि
वैदर्भीकेलिशैलेमरकतशिखरादुत्थितैरंशुदर्भैर्ब्रह्मांडाघातभग्नस्यदजमदतयाह्रीधृतावाङ्मुखत्वैः॥कस्यानोन्नानगायादिविसुरसुरभेराश्यदेशांगतानैर्यङ्गोग्रासप्रदानव्रतसुकृतमवि
श्रांतमुज्जृंभतेस्म॥१०५॥विधुकरपरिरंभादात्मनिस्यंदपूर्णैःशशिदृषदुपक्लृप्तैरालवालैस्तरूणां॥विफलि॥ट

मथपक्षतिभ्यांनभोविभागात्तरसावतीर्य॥निवेशदेशाततधूतपक्षःपपातभूमावुपभैमिहंसः॥१॥आकस्मि
कःपक्षपुटाहतायाःक्षितेस्तदायःस्वनमुच्चचार॥द्रागन्यविन्यस्तदृशःसतस्याःसंभ्रान्तमंतःकरणंचकार॥२॥
नेत्राणिवैदर्भसुतासखीनांविमुक्ततत्तद्विषयग्रहाणि॥प्रापुस्तमेकंनिरुपाख्यरूपंब्रह्मेवचेतांसियतव्रता
नां॥३॥हंसंतनौसंनिहितंचरंतंमुनेर्मनोवृत्तिरिवस्विकायां॥गृहीतुकामादरिणाशयेनयत्नादसौनिश्च
लतांजगाहे॥४॥तामिंगितैरप्यनुमायमायामयन्नभैम्यावियदुत्पपात॥तत्पाणिमात्मोपरिपातुकंतुमोघंवि
तेनेप्लुतिलाघवेन॥५॥व्यर्थीकृतंपत्ररथेनतेनतथावसायव्यवसायमस्याः॥परस्परामर्पितहस्ततालं
तत्कालमालीभिरहस्यतालं॥६॥उच्चाटनीयःकरतालिकानांदानादिदानींभवतीभिरेषः॥यान्वेतिमांद्रु
ह्यतिमह्यमेवसात्रेत्युपालंभितयालिवर्गः॥७॥धृतांल्पकोपाहसितेसखीनांछायेवभास्वंतमभिप्रयातुः॥

श्यामाथ हंसस्य करानवाप्तेर्मंदाक्षलक्ष्याल्लगतिस्मपश्चात्॥८॥ शस्त्रा न हंसाभिमुखी पुनस्ते पातेति ताभिश्छ
ल्लहस्यमाना॥ साहस्यनैवा शकुनी भवेन्मे भाविप्रियावेदक एष हंसः॥९॥ हंसोप्यसौ हंसगतेः सुदत्याः पुरःपु
रश्चारु चरन्बभासे॥ वैलक्ष्यहेतोर्गतिमेतदीयामग्रेतु कृत्योपहसन्निवोच्चैः॥१०॥ पदेपदे भाविनि भाविनी
तं यथा करप्राप्यमवेति नूनं॥ तथा सखेलं चलता लतासु प्रतार्यते तेन चकृषेक्षशांगी॥११॥ रुषा निषिद्धालिज
नां पदेनां छायाद्वितीयां कलयांचकार॥ तदाश्रमांभःकणभूषितांगीसकीरवन्मानुषवागवादीत्॥१२॥
अये कियद्यावदुपैषि दूरं व्यर्थं परिश्राम्यसि वा किमर्थं॥ उदेति ते भीरपि किन्तु बाले विलोकयन्त्या नद्य
नावतालीः॥१३॥ इत्थार्पयन्तीमपथे पदं त्वां मरुल्ललल्पल्लवपाणिकंपैः॥॥ आलीवपश्यप्रतिषेधयं
न्तीं कपोतहुंकारगिरा वनाली॥१४॥ धार्यः कथंकारमहं भवत्या वियद्विहारी वसुधैकगत्या॥ अहो शिशु

त्वंतवखंडितंनस्मारस्यसख्यावयसाप्यनेन॥१५॥महत्स्वपत्राम्मतनपत्रहंसवंशस्यपत्राणिपतत्त्रिणाःस्मः॥
अस्मादृशांचाटुरसामृतानिस्वर्लोकलोकेतरदुर्लभानि॥१६॥स्वर्गापगाहेममृणालिनीनांनाला
मृणालाग्रभुजोभजामः॥अन्नानुरूपांतनुरूपऋद्धिंकार्यंनिदानाद्धिगुणानधीते॥१७॥धातुर्निदेशादि
हनैषधीयंलीलासरःसेवितुमागतेषु॥हैमेषुहंसेष्वहमेकएवभ्रमामिभूलोकविलोकनोत्कः॥१८॥
विधेःकदाचिद्भ्रमणीविलासेश्रमातुरेभ्यःस्वमहत्तरेभ्यः॥स्कंधस्यविश्रांतिमदांतदाहिश्रम्यामिता
विश्रमविश्वगोपि॥१९॥बंधायदिव्येनतिरश्चिकश्चित्पाशादिरासादितपौरुषःस्यात्॥एकंविना
मादृशितंनरस्यस्वर्भोगभाग्यंविरलोदयस्य॥२०॥दृष्टेनपूर्तेनततस्यवश्याःस्वर्भोगमत्रापिहजं
तिदेवाः॥महीमहोदोहदसेकशक्तेयकातिकंकोरकमुद्गिरंति॥२१॥सुवर्णशैलादवतीर्यतूर्णं

ने

स्वर्वाहिनीवारिकणावकीर्णैः॥ तं वीजयामः स्मरकेलिकाले पक्षैर्नृपं चामरबद्धसख्यैः॥२२॥ क्रियेत चेत्सा
धुविभक्तिचिंता व्यक्तिस्तदा सा प्रथमाभिधेया॥ यास्वौजसां साधयितुं विलासैस्तावत्क्षमानामपदं बहु स्या
त्॥२३॥ राजा मयज्वा विबुधव्रजत्रा कृत्वाध्वराज्योपमयैव राज्यं॥ भुंक्ते श्रितश्रोत्रियसात्कृतश्रीः पूर्वं त्व
हो शेषमशेषमंत्यं॥२४॥ दारिद्र्यदाऽरिद्र्यविरोधोववर्षैरमोघमेवव्रतमर्थिसार्थः॥ संतुष्टमिष्टानि तमि
ष्टदेवं नाथंति के नाम न लोकनाथम्॥२५॥ अस्मत्किल श्रोत्रसुधां विधाय रंभा चिरं भामतुलां नलस्य
॥तत्रानुरक्ता तमनाप्य भेजे तन्नामगंधान्नलकूबरं सा॥२६॥ स्वर्लोकमस्माभिरितः प्रयातैः केलीषु
तद्गानगुणान्निपीय॥ हाहेति गायत्यदशोचि तेन नाम्नेव हाहा हरिगायनोभूत्॥२७॥ शृंगारवनसद्दा
रस्तदुदारभावं हृष्यन्मुहुर्लोमपुलोमजायाः॥ पुरापतनालोकननाकपालः प्रमोदबाष्पावृतने

निर्जिता

णानादिवास्य द्वात्रिंशतादंतमपीभिरन्तः॥ चतुर्द्दशाष्टादशचात्र विद्या द्वेधांपि संतीतिशशंसवेधाः॥
॥३५॥ श्रियेतरैर्बृहस्पतिरीद्यतस्यस्मारामरेन्द्रावपि न स्मरामः॥ वासेतसम्यक्द्रुमयोश्चतस्मिन्बुद्धे
नदृष्मःखलुशेषबुद्धे॥ ३६॥ विनापतत्रं विनतातनूजैः समीरसौरीक्रुराल्लक्रुणीयैः॥ मनोभिरामी
दत्तगुप्रमाणैर्नत्वं द्विनादिक्क नमातत्तदश्वैः॥ ३७॥ संग्रामभूमीषु भवत्यरीणामश्वैर्नदीमातृकतां
गतासु॥ तद्वाणधारापवनाशनानां राजव्रजैर्यैरसुभिः सुभिक्षं॥ ३८॥ यशोपदस्याजनि संयुगेषुकं
दुत्तभावं भजताभुजेन॥ हेतोर्गुणाद्देयदिगापगाल्नी कूलंकषत्वव्यसनंततदीयं॥ ३९॥ पदित्वैलो
कीगणानापरास्यात्तस्याः समाप्तिर्यदितापुषः स्यात्॥ पारंपराद्वंगणितंयदिस्याद्गुणोपनिः शेषगुणो
पिसः स्यात्॥ ४०॥ श्रवारितद्वारतयातिरश्चामन्तःपुरेतस्यनिविश्यराज्ञः॥ गतेषुरम्येष्वधिकंवि

नैषः
२५

शेषमध्यापयामःपरमाणुमध्याः॥४१॥पीयूषधारानवधाराभिरंतस्तासांरसोदन्वतिमज्जयामः॥रंभादिसौ
भाग्यरहःकथाभिःकाव्येनकाव्यंसृजताहताभिः॥४२॥कामिर्नतत्राभिनवस्मराज्ञाविश्वासनि
क्षेपवणिक्क्रियेहं॥जिह्रेतियंनैवकुतोपितिर्यक्कश्चित्तिरश्चस्त्रपतेनतेन॥४३॥वार्त्तापिनासत्यपि
सान्यमेतियोगादरंध्रेहृदियांनिरुन्धे॥विरंचिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णा
॥४४॥तत्राश्रयेरात्रिदिवोपभोगंतवाननवाप्यंल्लभतेवतान्या॥कुमुद्वतीवेन्दुपरिग्रहेणाज्यो
त्स्नोत्सवंदुर्लभमंबुजिन्याः॥४५॥तन्नैषधानूढतयादुरापंशर्मत्वयास्मत्कृतचाटुजन्म॥रसा
लवन्यामधुपानुविद्धंसौभाग्यमप्राप्तवसंतयेव॥४६॥तस्यैववायास्यसिकिंनहस्तंदृष्टंमनःपौ
नविधेःप्रविश्य॥अजातपाणिग्रहणासितावद्रूपस्वरूपातिशयाश्रयश्च॥४७॥निशाशशांकं

राम
२५

शिवपागिरीशंश्रियाहरिंयोजयतःप्रतीतः॥विधेर्पिस्वारसिकःप्रयासःपरस्परंयोग्यसमागमाय॥४८॥
वेलातिगस्त्रैणगुणाब्धिवेणीर्नयोगयोग्यासिनलेतरेण॥संदर्भ्यतेदर्भगुणेनमल्लीमालानमृद्वीभृ
शकर्कशेन॥४९॥विधिंवधूसृष्टिमपृच्छमेवतद्यानयुग्योनलकेलियोग्यां॥त्वन्नामवर्णा
इवकर्णपीतामयास्यसंक्रीडतिचक्रिचक्रे॥५०॥अन्येनपत्यात्वयियोजितायांविज्ञत्वकीर्तिर्ग
तजन्मनोवा॥जनापवादार्णवमुत्तरीतुंविधाविधातुःकतमातरिःस्यात्॥५१॥आस्तांतदप्रस्तु
तचिंतयालंमयासितन्विश्रमितातिवेलं॥सोहंतदागःपरिमार्ष्टुकामस्तवेप्सितंकिंविदधेभिधे
हि॥५२॥इतीरयित्वाविररामपत्रीसराजपुत्रीहृदयंबुभुत्सुः॥हृदेगभीरेहृदिचावगाढेशंसंति
कार्यावसरंहिसंतः॥५३॥किंचित्तिरश्चीनविलोलमौलिर्विचिंत्यवाचंमनसामुहूर्तं॥पतत्रि

नैषः २६

णांसापृथिवीन्द्रपुत्रीजगादवक्त्रेणतृणीकृतेन्दुः॥५४॥ धिक्चापलेवत्सिमवत्सलत्वंयत्प्रेरणादुत्तरली-
भवन्त्या॥ समीरसंगादिवनीरभंग्यामयातटस्थस्त्वमुपद्रुतोसि॥५५॥ आदर्शतांस्वच्छतयाप्रयासिसतां
मतावत्खलुदर्शनीयः॥ आगःपुरस्कुर्वतिसागसंमांयस्यात्मनीदंप्रतिबिंबितंते॥५६॥ अनार्यमप्याचरि-
तंकुमार्य्याभवान्ममक्षाम्यतुसौम्यतावत्॥ हंसोपिदेवांशतयासिवंद्यःश्रीवत्सलक्ष्मेवहिमत्स्यमूर्त्तिः॥५७॥
मत्प्रीतिमाधित्ससिकांत्वदीक्षामुदंमदक्ष्णोरपियातिशेतां॥ निजामृतैर्लोचनसेचनाद्वापृथक्कि-
मिंदुःसृजतिप्रजानां॥५८॥ मनस्तुयंनोज्झतिजातुयातुमनोरथःकंठपथंकथंसः॥ कानामबालाद्वि-
जराजपाणिग्रहाभिलाषंकथयेदलज्जा॥५९॥ वाचंतदीयांपरिपीयमृद्वीम्मृद्वीकयातुल्यरसांसहं-
सः॥ तत्याजतोषंपरपुष्टघुष्टेघृणांचवीणाक्वणितेवितेने॥६०॥ मंदाक्षमंदाक्षरमुद्रमुक्त्वातस्यांस

राम २६

माकुंचितवाचिहंसः॥ नह्यस्मितेकिंचनसंशयात्तुगिरामुखांभोजमयंपुपोज॥६१॥ कोरणावांछेवविधुं
विधतुंयमित्यमात्यादरिणीतमर्थे॥ पातुंश्रुतिभ्यामपिनाधिकु वेवर्णाश्रुतेर्वर्णाइवांतिमःकिं॥६२॥
अर्थाप्यतेवाकिमियद्भवत्याचित्तैकपद्यामपिविघ्नतेपः॥ यत्रांयकारःकिलचेतसोपिजिह्मेतरैर्ब्रह्मत
दप्यवाप्यं॥६३॥ ईशाणिमैश्व र्यविवर्तमध्येलोकेशलोकेशयलोकमध्ये॥ तिर्यंचमप्यंचमृषा
नभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञं॥६४॥ मध्येश्रुतीनांप्रतिवेशिनीनांसरस्वतीवासवतीपुरवेतः॥ हियं
वताभ्यस्ववन्तीयमद्धापथान्नक्षत्संगगुणोतवद्धा॥६५॥ पर्यंकतापन्नसरस्वदंकोल्लंकापुरीमप्यभि
ल्लाषिचित्तं॥ कुत्रापिचेद्वस्तुनितेप्रयातितदप्यवेहिस्वशयेशयालु॥६६॥ इतीरितापत्ररथेनतेन
नहीणाचहृष्टाचबभाणभैमी॥ चेतोनलंकामयतेमदीयंनान्यत्रकुत्रापिचसाभिलाषं॥६७॥ धि

नैषः
२२

चिन्त्यबालाजनशीलशीलनं त्वज्ज्ञानदीमज्जदनङ्गनागं॥ आचष्टविस्पष्टमभाषमाणामेनांसचक्राङ्कपत
त्रशङ्कः॥६८॥ नृपेणपाणिग्रहणस्पृहेति नलंमनःकामयतेममेति॥ आश्लेषिनश्लेषकवेर्भवत्या
:श्लोकद्वयार्थःसुधियामयाकिं॥६९॥ त्वद्वैतसःस्थैर्यविपर्ययंतुसंभाव्यभाव्यस्मितदज्ञएव॥
लङ्केहिबालाहृदिलोलशीले [illegible] दरापराद्धेषु रपिस्मरःस्यात्॥७०॥ महीमहेन्द्रःखलुनैष
धेनुस्तद्बोधतीपःकथमित्यमेव॥ प्रयोजनंसंशयकंप्रमीदृकएषजनेनैवसमद्विधेन॥७१॥ पि
तु [illegible] र्नियोगेनपदैकयावापुंयानमन्यंयदिचादृशाषि॥ त्वदर्थमर्थित्वकृतिप्रतीतिःकीदृग्मयि
स्यान्निषधेश्वरस्य॥७२॥ त्वयापिकिंशंकितविक्रियेस्मिन्नधिक्रियेवाविषयेनिधातुं॥ इतःप्र
यक्षप्रार्थ्यपसेतुयद्यत्कुर्वेनदुर्वीपतिपुत्रिसर्वम्॥७३॥ अवैःप्रविष्टाइवतत्क्षिरस्तान्निष्कूयवैम

राम
२२

त्यसुतेनमूर्द्ध्ना॥उचेह्रियोपिस्त्रथितातुरोधापुनर्धरित्रीपुरुहूतपुत्री॥७४॥मदन्यदानंप्रतिकल्पनायावे
दस्त्वदीयेहृदितावदेषा॥निशापिसोमेतरकान्तशंकामोङ्कारमग्रेसरमस्यकुर्याः॥७५॥सरोजिनीमान
सरागवृत्तेरनर्कसंपर्कमतर्कयित्वा॥मदन्यपाणिग्रहशंकितेयंमहोमहीयस्तवसाहसिक्यं॥७६॥सा
धुत्वयातर्कितमेतदेवस्वेनानलंयत्किलसंश्रयिष्ये॥विनासुतास्वात्मनितुप्रहर्तुंमृषागिरंत्वांनृप
तौनकर्तुं॥७७॥मद्विप्रलम्भंपुनराहयस्त्वांतर्कःसकिंतत्फलवाचिमूकः॥अशक्यशंकव्यभिचार
हेतुर्वाणी॥नवेदायदिसंतुकेतु॥७८॥अनैषधायैवजुहोतितातःकिंमांकृशानौनशरीरशेषां॥ईष्टेतनू
जन्मतनोःसनूनंमत्प्राणनाथस्तुनलस्तथापि॥७९॥तदेकदासीत्वपदादुदग्रेमदीप्सितेसाधुवि
धित्सुताते॥अहेलिनाकिंनलिनीविधत्तेसुधाकरेणापिसुधाकरेण॥८०॥तदेकलुब्धेहृदिमे

श्री

नैषः
१८

त्तिलब्धुं चिंतातचिंतामणिमप्यनर्घ्यम्॥ चित्रेममैकः सकलत्रिलोकीसारोनिधिःपद्ममुखःसएव
॥८१॥ श्रुतःसदृष्टश्चहरित्सुमोहातध्यातःसनीरंध्रितबुद्धिधारम्॥ ममाद्यतत्प्राप्तिरसुव्ययोवाहस्ते
तवास्तेद्वयमेकशेषः॥८२॥ संचीयतामाश्रुतपालनोत्थंमत्प्राणविश्राणनजंचपुण्यं॥ निवार्यता
मार्यवृथाविशंकाभद्रेपिमुद्रेयमयेमृशंका॥८३॥ अलंविलंब्यप्रियविज्ञयाश्वांकृत्वापिवा
म्यंविधिधेयंविधेये॥ यशःपथादाश्रवतापदोत्थात्खलुस्खलित्वास्तखलोक्तिखेलात्॥८४॥
स्वजीवमप्यार्तमुदेददद्भ्यस्तवत्रपानेदृशवद्धमुष्टेः॥ मत्थ्यंमदीयान्यदसूनदित्सोधर्मःकराद्भ्र राम
श्यतिकीर्तिधौतः॥८५॥ दत्त्वात्मजीवंत्वयिजीवदेपिशुद्ध्यामिजीवाधिककादेतुकेन॥ विधेहितन्मा १८
त्वदृणात्यशोद्भुममुद्रदारिद्र्यसमुद्रमग्नाम॥८६॥ कीर्णाद्वमञ्जीवितमेवपणायमन्यन्नचेदस्ति

तदस्तुपुण्यं॥जीवेशदातर्यदितेनदातुंयशोपितावत्प्रभवामिगातुम्॥८७॥वराटिकोपक्रिययापिलभ्या
न्नेभ्याःकृतज्ञानथवाद्रियंते॥प्राणैःपणैःस्वैर्निपुणंभजन्तःक्रीणंतितानेवतुहंतसंतः॥८८॥सभूभृद
ष्टावपिलोकपालास्तैर्मेतदेकाग्रधियःप्रसेदुः॥नहीतरस्माद्धुरितंयदेत्यस्वयंतदाप्तिप्रतिभूर्ममाभू
ः॥८९॥अकाण्डमेवात्मभुवार्जितस्यभूत्वापिमूलंनमपिवीरशास्य॥भवान्नमेकिंनलदत्वमेत्यकर्त्ता
ल्हदस्वंदनल्पपकृत्यं॥९०॥अलंविलंब्यत्वरितुंहिवेलाकार्येकिलस्थैर्यसहेविचारः॥गुरूपदे
शंप्रतिभेवतीक्ष्णाप्रतीक्षतेजातुनकालमर्त्तिः॥९१॥अभ्यर्थनीयःसगतेनराज्ञात्वयानशुद्धान्तगतो
मदर्थम॥प्रियास्यदाक्षिण्यबलात्कृतोहितदोदपेदन्यथभूनिषेधः॥९२॥शुद्धान्तसंभोगनितान्त
तुष्टेननैषधेकार्यमिदन्निगाद्यम॥अपांहितृप्तायनवारिधारास्वादुःसुगंधिःस्वदतेतुषारा॥९३॥भव

नैषः २९ यानि त्वयाग्रे नतगीरोमदर्थाः क्षुधाकदुष्णे त्वदि नैषधस्य॥ पितेन दूनेरमनेक्षिता पिति क्रापतेहैमकुन्नावतं
स॥९४॥ धरातुरासाहिमदर्थयाञ्चा कार्या न कार्यान्तरचुम्बिचित्तैः तदार्थितस्यान वचो वतिड्डा विभ
र्त्यवज्ञाचरणास्यमुद्राम्॥९५॥ विज्ञेन विज्ञाप्यमिदं नरेन्द्रे तस्मात्त्वयास्मिन्समयं समीक्ष्य॥ आत्यन्ति
कासिद्धिविलम्बसिद्ध्योः कार्यस्य कार्यस्य शुभा विभाति॥९६॥ इत्युक्तवत्यायदलोपि लज्जा सा तौ
चितीचेतसि नश्चकास्तु॥ स्मरस्तु साक्षीतदहोषतायामुन्माद्य यत्तत्तदवीव दन्ताम्॥९७॥ उन्म
त्तमासाद्य हरः स्मरश्च द्वावप्यसीमां मुदमुद्वहेतां॥ पूर्वः परस्यार्द्धितयाप्रसूतं नूनं द्वितीयो विरहाधिदू
नम्॥९८॥ तथाभिधात्रीमथ राजपुत्री निर्णीयतां नैषधवद्धरागाम्॥ अमोचि चञ्चूपुटमौनमुद्रा वि राम १९
हाय सा तेन विहस्य भूयः॥९९॥ इदं यदि क्ष्मापतिपुत्रि तत्त्वं पश्यामि तन्न स्वविधेयमस्मिन्॥ त्वामुद्व

केस्नापप्रतान्नपंचपंचेषुरोवाजिनियोजनेयं॥१००॥त्वहृद्वदुद्वेर्वहिरिन्द्रियाणांतस्योपवासव्र
तिनांतपोभिः॥त्वामद्यलब्ध्वाऽमृततृप्तिभाजांस्वंदेवभूयंचरितार्थमस्तु॥१०१तुल्यावयोर्मूर्तिर
भून्मदीयादग्धापरंसाप्यनतात्पतेपि॥इत्यभ्यसूयन्निवदेहतापंतस्यातनुस्त्वद्विरहाद्विधत्ते॥१०२
॥लिपिंदृशाभित्तिविभूषणांत्वांन्नपःपिबन्नादरनिर्निमेषः॥चक्षुर्म्मनै[illegible]र्पितमात्मचक्षुरा
गंसवक्त्रेरक्षितंत्वयेव॥१०३॥यातुर्दृशालेख्यमयीन्नपस्यत्वामादरा[illegible]दस्तनिमीलयाक्ष्णो
॥ममेदमित्यश्रुगिरानेत्रवृत्तेःप्रीतेर्निमेषच्छिदयाविवादः॥१४॥त्वंहृद्गताभैमिवहिर्गतापिप्रा
णायितानासिकयास्यगत्या॥नचित्रमाक्रामतितत्रचित्रमेतन्मनोयद्भवदेकवृत्ति॥१०५॥त्व
जन्मारोहमिदूरदीर्घांसंकल्पसोपानततिंतदीयां॥स्वासान्सवर्षत्यधिकंपुनर्यद्ध्यानात्तवत्व

नै

नै

न्मपतामवाप्य॥१०६॥हृत्तस्ययन्मंत्रयतेरहस्त्वांतद्ध्यान्तमामंत्रयतेमुखंयत्॥तद्वैरिपुष्पायुधमित्रच
न्द्रसख्यो चितीमाकिमुतत्सुखस्य॥१०७॥स्थितस्यरात्रावधिशय्यशय्यांमोहेमनस्तस्यनिमज्जयन्ती
॥आलिंग्ययाचुंबतिलोचनेसानिद्राधुनातंचहतेङ्गनावा॥१०८॥स्मरोग्रनिस्तद्रुपदेथैववार्तोन्नी
वराप्यशेषांकृशतामनायि॥अनङ्गतामप्ययमाप्यमानःस्पर्द्धांनसार्द्धंविजहातितेन॥१०९॥त्वत्प्रापका
न्नस्यतिनैनसोपित्वय्ये यदास्येपितल्लज्जतेयत्॥स्मरेणवाणैरतितक्ष्णतीक्ष्णैर्लूनःस्वभावोपिकि
यान्किमस्य॥११०॥स्मारंज्वरंघोरमपत्रपिष्णोःसिद्धागदंकारचयेचिकित्सौ॥ निदानमौनादवि
शद्विशाल्लासांक्रामिकीतस्यरुजेवलज्जा॥१११॥विभेतिरुष्टासिकिलेत्यकस्मात्सत्वांकिला
पेतिहसत्यकाण्डे॥याचीमिवत्वामनुयात्यहेतोरुक्तस्त्वयेवप्रतिवक्तिमौनम्॥११२॥मवद्विपो

गाढ्ढि दुरार्त्तिधारायमस्त्वसुमज्जतिनिश्शरराय:॥मूर्छामपद्वीपमहांव्यपंकेहाहामहीभृद्भटकुंजरोयम॥११३
॥सव्यापसव्यत्यजनाद्द्विरुक्तैः पंचेषुवाणैः पृथगर्जितासु॥दशासुशेषःखलुतद्दशायातयातभः पुष्पतु
कोरकेण॥११४॥त्वचिपिस्मराधैःसततास्मितेनप्रस्थापितोभूमिभृतास्मितेन॥आगत्यभूतःसफलोभव
त्याभावप्रतीत्यागुणलोभवत्याः॥११५॥धन्यासिवैदर्भिगुणैरुदारैर्ययासमाकृष्यतनैषधोपि॥इ
तःस्तुतिःकाखलुचन्द्रिकायायदब्धिमप्युत्तरलीकरोति॥११६॥नलेनभायाःशशिनानिशेवत्व
यासभायान्निशयाशशीव॥पुनःपुनस्तद्युगयुग्विधातायोग्यामुपास्तेनुयुवांयुयुक्षुः॥११७॥स्तनद्व
येतन्विपरंतवैवपृथौयदिप्राप्स्यतिनैषधस्य॥अनल्पवैदग्ध्यविवर्द्धितीनांपत्रावलीनांवचना २
समाप्तिं॥११८॥एकःसुधांशुर्नकथंचनस्यात्तृप्तिःक्षमस्त्वन्नयनद्वयस्य॥त्वल्लोचनासेचनकात्तद

३

नैषः स्तुनल्लास्यशीतद्युतिमद्वितीयः॥११९॥ अहो तपःकल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदंकुरश्रीः॥ त्वद्भ्रू
३१ युगं यस्य खलु द्विपत्री तवाधरो रज्यति यत्प्रवालः॥१२०॥ पत्रेन नवः पल्लवितः कराभ्यां स्मितेन यः कोरकि
तस्तवास्ते॥ अङ्गम्रदिम्ना तव पुष्पितो यः स्तनश्रिया यः फलितस्तवैव॥१२१॥ युग्मम्॥ कंसीकृतासी
त्खलु मंडलींदोः संसक्तरश्मिप्रकरा स्मरेण॥ तुलां च नाराचलता निजैव मिथोनुरागस्य समीकृतौ वां॥
॥१२२॥ सत्त्वश्रुतस्वेदमधूत्थसान्द्रे तत्पाणिपद्मे मदनोत्सवेषु॥ लग्नोत्थितास्त्वत्कुचपत्रलेखास्त्वं नि पं४
र्गतास्तं प्रविशंतु भूयः॥१२३॥ वंधाढ्यनानारतमल्लयुद्धप्रमोदितैः केलिवने मरुद्भिः॥ प्रसूनवृष्टिं पु राम
नरुक्तमुक्तां प्रतीक्ष्य तं भैमि युवां युवानौ॥१२४॥ अन्योन्यसंगमवशादधुना विभातां तस्यापि तेपि म ३१
नसी! विकसद्विलासे॥ स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तमादाविव द्व्यणुककृत्परमाणुयुग्मम्॥१२५॥

राजहंसो नृपश्रेष्ठे कादंबकलहंसयोरिति विश्वः ३

मुक्तोलकः खचेरः

हारभेदा यष्टिभे
दा गुच्छगुच्छार्द्धगो
स्तना इत्यमरः

कामः कौसुमचापदुर्ज्जयममुं जेतुं नृपं त्वां धनुर्वल्लीमव्रणां वंशजामधिगुणामासाद्य मा घत्यसौ ॥ ग्रीवा
लंकृतिपट्टसूत्रलतया पृष्ठे कि यल्लंबया भ्राजिष्णुः कबरेष पैवविलसत्सिंदूरसौंदर्यया ॥११६॥ त्व
द्गुच्छावलिमौक्तिकानि गुलिकास्तं राजहंसं विभो वेध्यं विद्धि मनोभुवः स्वमपितां मंजुं धनुर्मञ्जरीम
॥ यन्नित्यां कनिया सल्लालितत मज्याभुज्यमानं लसन्नाभीमध्यविलाविलासमरविकं रोमालिराल्लं
वते ॥११७॥ पुष्पेषु श्चिकुरेषु ते शरचयं स्वं मालमूर्ल्ले धनूरौढे चक्षुषि तज्जितस्तु मनुस्त्राष्टं च पाश्चि
क्षिपे ॥ तिर्विद्या श्वयदाश्रमं सवितनुस्त्वां तज्जयाया धुनापत्रालिस्त्वदुरोजशैलनिलयात त्पर्णी
शालायते ॥११८॥ इत्यालपत्यथ पतत्रिशिते तत्र भैमी सख्यस्त्विरान्तदनुसंधिपराः समीयुः ॥ शर्मास्तु
ते विसृज मामिति सोप्युदीर्य वेगाज्जगाम निषधाधिपराजधानीम् ॥११९॥ चेतोजन्मशरप्रसूतम

नैषः
३१

मा
क्षुभिर्व्यामिश्रतांश्रयन्त्रेयोद्भूतपतङ्गपुंगवगवीहैयंगवीनंरमात॥स्वादंस्वादमसीममिष्टसुरभिप्राणापित
प्तिनसातापंप्रापनितान्तमन्तरतुल्यामानर्छमूर्छामपि॥१३०॥तस्यादृशोर्वियतिबंधुमतुव्रजन्त्यास्तं
वाष्पवारिन चिरादवधीविभूव॥पार्श्वेपिधिप्रचक्रमेपदनेनदृष्टेरारादपिव्यवदधेनतुचित
वृत्तेः॥१३१॥अस्तित्वंकार्यसिद्धेःस्फुटमथकथयत्यक्रूपोःकंपमेदैरारव्यातुंष्टन्तमेतन्निषधनरप
तौसर्व मेकःप्रतस्थे॥कान्तारेनिर्गतासिप्रियसखिपदवीविस्मृताकिन्तुमुग्धेमारोदीरेहियामेत्यु
पल्हतवचसोनिस्तुरेतांवयस्याः॥१३२॥सरसिनृपमपश्यद्यत्ततीरभाजःस्मरतरल्लमशोकानो
कहस्योपमूलम॥किशलयदलतल्पम्लायितंप्रापतंसज्वलदसमशरेषुस्यद्विपुष्पद्विमोक्षैः राम
॥१३३॥परवतिदमयन्तित्वांनकिंचिद्वदामिद्रुतमुपतमकिंमामाहसाशंसहंस॥॥इतिवद ३२

नितन्ले ऽसौ तत्क्षणं सोपनम्रः प्रियमनुसुकृतां हि स्वस्य हायाविलंबः॥३४॥ कंथितमपिनरेन्द्रुः संशयामास
हंसं किमिति किमिति पृछन्भाषितं स प्रियायाः॥ अधिगतमथ सांद्रानंदमाध्वीकमत्तः स्वयमपि शतकृत्व
स्तत्तथान्वाचचक्रे॥१३५॥ ॥श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रिय
चयं मामल्लदेवी च यं॥ तार्तीयीकतया मितोयमगमत्तस्य प्रबंधे महाकाव्ये चारुणि नैषधीयचरिते सर्गो नि
सर्गोज्वलः॥ समाप्तोयं तृतीयः सर्गः॥ ॥श्रीविश्वेश्वरोधिजयतेतराम्॥ अथ नलस्य गुणं गुणमात्मभूः सु
रभितस्य यशः कुसुमं धनुः॥ श्रुतिपथोपगतं सुमनस्तया तमिषुमाशु विधाय जिगाय तां॥१॥ यदतनुज्वरभा
क्तनुते स्म सा प्रियकथासरसीरसमज्जनम्॥ सपदि तस्य चिरान्तरतापिनी परिणतिर्विषमा समपद्यत॥२॥
ध्रुवमधीतवती यमवीरतां दयितदूतपतत्रतवेगतः॥ स्थितिविरोधकरी घुणकोदरी तनुदितः स हियो

नैष:
३३ यदतनुरः॥३॥ अतितमां मम पादि जडाशयं स्मितलवस्मरशोपितदाननं॥ अजनि पंगुरयं गतिजां गताभ्र
मिकशोपितदीक्रमखंजतः॥४॥ किमु तदन्तरभौमिभिषजो दिवःस्मरनलेन विशतः स्मधिगाहितुं॥ तदभि
केन चिकित्सितुमाश्रुजांमरवभुजामधिपेन नियोजितो॥५॥ कुसुमचापजतापसमाकुलं कमलकोमलमैद्ध्य कोमलत्र
ततनु खं॥ अहरहर्वहदभ्यधिकाधिकां रविरुचिग्लपितस्य विधोर्विभाम॥६॥ तरुणतातनरशोधु
तितिर्मितकुट्टिमतत्कुचकुंभयुगं तदा॥ अनलसंगतितामयमुपेतुतो कुसुमचापकुलालविलासजं॥७॥
अधृतयद्विरहोष्मणि मज्जितं मतसिजेन तनद्रुरुपुगं तदा॥ स्पृशति तत्कदनं कदलीतरुर्यदिमहज्वल राम
दूषरदूषितः॥८॥ स्मरशराहतिनिर्मितसंज्वरं कगुपुगं हसति स्मदमस्वसुः॥ अनपिधातपतत्तपना ३३
तपंतपनिपीतसरः सरसीरुहं॥९॥ मदनतापभरेण विदीर्यतो यदुदपादि हृदा दमनस्वसुः॥ती

विडपीनकुचद्वयपं चगात्तमपराधमधात्स्वतिवघ्नती॥१०॥ निविशतेपदिशःकशिखापदेस्त्रजत्तिमा
क्रियतीमिवनव्यथां॥मृदुत्तनोर्वितनोत्तुकथं नता मयतिमृत्तुनिविश्यस्त्वद्धिरिस्थितः॥११॥मनसिमत्त
मिवप्रियमीक्षितुंनयनयोःस्पृहयात्तरुपेतयोः॥ग्रहणाशक्तिरभूदिदमीययोरपिनमस्तुखवास्तुति
न४ वमुनि॥१२॥ह्रदिदमस्वसुरभ्रु[illegible]रस्नुतेप्रतिफलद्विरहात्तमुखाननैः॥ह्रदयभाजमरात्तचुंवितुंन ज४
ल मुपेत्यकिलागमितन्मुखम्॥१३॥मुह्रदमग्निमुदंचयितुंस्मरंमनसिगंधवहेनमृगीदृशः॥अक
ल्लिनिःश्वसितेनविनिर्गमानुमितनिह्नुतवेशनमायिता॥१४॥विरहपांडिमरागतमोमषीशी
शितिमतत्त्विजपीतिमवर्णकैः॥दशदिशःखलुतदृगकल्पयल्लिपिकरीनलरूपकचित्रिताः॥
॥१५॥स्मरकृतांह्रदयस्यमुहुर्दशांवहुवदन्तिवतिश्वसितानिलः॥व्यथितवासमसिकंपमदःस्त्रि

तेत्रसतिकः सतिना श्रयया वने ॥१६॥ कायदातन लोचननामभिः शतदलैः सुतनोर्विरहज्वरो ॥ इति विमहो
वहुपीतवरं चिरादति शतापमिषाद्दवमृज्झत ॥१७॥ उदयति स्मतदद्भुतमालिभिर्धरणिभृद्भुवि तत्र वि
मृश्यपत ॥ अनुमितोपि च वाष्पनिरीक्षणाद्व्यभिचचार न तापकरो नलः ॥ हृदि विदर्भभुवः प्रहरन्
शरैरतिपतिर्निषधाधिपतेः कृते ॥ कृततदन्तरगस्च दृढव्यथः फलदनीतिरमूर्छदलं खलु ॥१९॥
विधुरमानितया यदि भानुमान्कथमहो स तु तद्धृदयं तथा ॥ अपि वियोगभरास्फुटनस्फुटीकृतदृषत्त्वम
जिज्वलणुभिः ॥२०॥ हृदयनसरोरुहयानया क्षमदृग्गस्तु वियोगति मग्नया ॥ प्रियधनुः परिरम्य हृदा
रतिः किमनुमर्त्तुमशेत चितार्चिषि ॥२१॥ अनलभावमियं स्वनिवासिनो न विरहस्य रहस्यमबुध्यत
॥ प्रशमनाय विधायतृणान्यसृक्स्वचलन्ति तितत्रयदुक्षितुमेहत ॥२२॥ प्रकृतिरेतु गुणाः सेन योषितांक

दं९ दप२

ध्यमिमां हृदयं मृदुनामयत॥ तदिषुभिः कुसुमैरपि दुश्चता सुविहितं विबुधेन मनोभुवा॥२३॥ रिपुतरा
म वनाद विनिर्यती विधुरुचिर्गृहजालविलैर्नुतां॥ इतरथात्मनिवारणशंकयाच्चलपितुं विशवेषणा ५
विशत॥२४॥ हृदि विदर्भसुवोऽश्रुभृति स्फुटं वितनमदास्यतया प्रतिविंवितं॥ मुखवद्धगोऽछमशेपि मनो
भुवा तदुपमा कुसुमान्यखिलाः शराः॥२५॥ विरहपांडुकपोलतलेऽ वि विंवितं॥ मुखवद्धगोऽछमशेपिम
नोभुवा तदुपमा कु॥ विधुर्व्यधित भीमसुवः प्रतिविंवितः॥ अतुपलन्द्यसितां शुतया मुखं निजमवं
मुखमंकमृगार्पणात॥२६॥ विरहतापिनि चंदनपांसुभिर्वपुषि सार्पितपांडिमभंडना॥ विघधा
म विशाभरणादधैरतिपतिं प्रतिशंभुविभीषिकाम॥२७॥ वितिहितं परितापिनि चंदनं हृदितया
